③ - यास्कीय-निर्वचन ①

## १- आचार्यः-

आचार्यः आचारं ग्राहयति आचिनोत्यर्थान् आचिनोति बुद्धिमिति वा। शब्दैः यास्केन आचार्यस्य त्रीणि निर्वचनानि कृतानि।

आचारं ग्राहयति -

अर्थात् शिष्येभ्यो गुणाचार-सदाचारादि आचारान् ग्राहयति अतः आचार्यो भवति। इत्थं शब्दोऽयम् आङ्पूर्वात् चरतेः ऋहलोर्ण्यत्- सूत्रेण ण्यत्-प्रत्ययकृते उपधा-वृद्धितो निर्मीयते।

- आङ् + चर् + ण्यत्
  - आ + चर + य (अनुबन्ध-लोपः)
  - आचार्य (उपधा वृद्धिः)
  - आचार्यः (सुप् करणात्)

मनुस्मृतावपि आचार्यशब्द एवं विवक्षितः-

उपनीय तु यः शिष्यं वेदमध्यापयेद्गुरुः।
सकल्पं स रहस्यं च तमाचार्यं प्रचक्षते॥

आचिनोति अर्थान् इत्याचार्यः

आचार्य आङ्पूर्वात् चि संवर्द्धने-चयने धातुतो निष्पन्नोऽस्ति। यतोहि स शास्त्रस्यार्थान् शिष्येषु समन्तं निवेशयति बुद्धिं चाऽपि संवर्धयति। आचार्यः विविधानाम् अर्थानां शिष्योपयोगिनां ज्ञान-विज्ञानविषयाणां चयनं कृत्वा शिष्येषु न केवलं निवेशयति अपितु बुद्धि-चयवनमपि करोति। आधुनिक सन्दर्भे तु स शिष्येभ्यो अर्थान् धनानि आचिनोति गृह्णाति।

आचिनोति बुद्धिम् इति वा-

शिष्याणां बुद्धिमाचिनोति अर्थात् क्रमशः शिष्येषु बुद्धिसंवर्धनं करोति इति आङ्-पूर्वकात् चि-संवर्द्धने धातुतो निष्पन्नोऽस्ति। इत्थमेव यस्मात् धर्मानाचिनोति इत्याचार्यः इत्यपि कथितुं शक्यते। उक्तं चैकत्र -

स्वयमाचरते यस्मात् आचारं स्थापयत्यपि।
आचिनोति च शास्त्राणि यमैः सन्नियमैर्युतः॥

Date

Page

2- **वीरः**

वीरो वीरयत्यमित्रान् । वेतेर्वा स्याद् गतिकर्मणः । वीरयतेर्वा ॥

वीरयत्यमित्रान् -

वि-उपसर्गपूर्वकात् ईर् क्षेपेऽथवा ईर् गतौ कम्पने च धातोः अन्तर्भावितण्यर्थात् पचाद्यच् प्रयोगेण निष्पन्नो वीरः वीरोऽस्ति यतोहि सः अमित्रान् शत्रून् वीरयति - विविधप्रकारं वीरयति क्षिपति कम्पयति मारयति वा ॥ वि+ईर+अच्

वेतेर्वा स्याद् गतिकर्मणः

गतिकर्मणो गत्यर्थे वर्तमानस्य वेतेः अर्थात् वी-धातोः औणादिको रक् प्रत्यये कृते वीरो भवति, यतोहि अयं शत्रून् अभिमुखं गच्छतीत्येव प्रायः । अथवा शत्रून् गमयति पलायनं करोति इति वा ॥

— वीरयतेर्वा-

विक्रान्ति-अर्थकस्य वीर- विरोधने (०. क्षेपणे) जये अथवा पराक्रमे धातोः निष्पद्यते वीरशब्दः यतोहि असौ विक्रमवान् भवति, विक्रमं कुरुतेऽथवा शत्रुषु वीरयते । शत्रून् वारयति जयति वा ॥

3. **ह्रदः-**

ह्रदो ह्रादतेः शब्दकर्मणः ह्लादतेर्वा स्याच्छीतीभावकर्मणः

— ह्रादतेः शब्दकर्मणः

शब्दार्थस्य ह्राद धातोः पचाद्यच्-सूत्रेण अच् प्रत्यये कृते बाहुलकाद् ह्रस्वो भूत्वा ह्रदः सञ्जायते । यतोहि अयं शब्दं करोति । अतः ह्रादते अव्यक्तशब्दं ह्यसावभिहन्यमानः करोति इति ह्रदः ।

— शीतीभावकर्मणो ह्लादतेर्वा - शीतीभावार्थस्य ह्लादी सुखे चेति धातोः अच् प्रत्यये कृते लस्य रत्वं भूत्वा सञ्जायतेऽथवा यतोहि ग्रीष्मेऽप्यसौ शीतल एव भवति अतः जनान् ह्लादयति सुखयतीति ।

Scanned with CamScanner

Date
Page

3- गौ-

यास्केन निर्वचनवर्गेषु बहुधा संप्रयुक्तं गोशब्द अनेकधा उक्तो यथा - गौरिति पृथिव्या नाम धेयम् । गौरादित्यो भवति । अथापि गौरुच्यते इत्यादय प्रसङ्गा विशेषतयोल्लेखनीयाः सन्ति । अत्रैव त्रयमपि संलक्ष्य किञ्चिदुच्यते-

क- गौरिति पृथिव्या नामधेयम् । यद् दूरं गता भवति । यच्चास्यां भूतानि गच्छन्ति । गातेर्वौकारो नामकरणः

- दूरं गता भवति-

यद् यस्मादियं दूरमध्वानं प्रति गता भवति । अस्याः अन्तो नोपलभ्यतेऽतः इयं पृथिवी गौरस्ति ।

- अस्यां भूतानि गच्छन्ति-

यस्माच्च अस्यां आधारभूतायां पृथिव्यां भूतानि सर्वाणि प्राणिनः सर्वे जन्तवश्च गच्छन्ति । अतः इयं गो भवति ।

उपर्युक्तकारणद्वयमधिकृत्य पृथिवीशब्दार्थे प्रयोज्यो गो-शब्दः कर्त्र्यधिकरणे वा गम् धातोः डो-प्रत्यये कृते डित्वाट्टिलोपात् सञ्जायते ॥

- गातेर्वौकारो नामकरणः

गातेः अर्थात् गाङ् गतौ-धातोः नामकरणत्वात् ओकारो भूत्वा निष्पद्यतेऽयं शब्दः । करोतीति करणो नाम्नः करणो नामकरण इति व्युत्पत्या गाङ् गतौ धातोः नामार्थ-प्रत्ययरूपेण ओकार-योगेन गो भवति ।

ख- आदित्योऽपि गौरुच्यतेऽपि च गौरादित्यो भवति-

गमयति रसान् गच्छत्यन्तरिक्षे अर्थात् असौ आदित्यो रसान् आत्मानं प्रति उपरर्थं वा गमयति किञ्च गच्छत्यन्तरिक्षे स एवाऽऽत्मा (आदित्यः) अपि च रसान् जलान् अन्तरिक्षे गमयति प्रेषयति जलं शोषयतीति वाऽथवा गमनशीलो भवति

Scanned with CamScanner

ग- ज्याऽपि गौरुच्यते-

गम्या चेत् ताद्धितमथ चेन्न गम्या गमयति इषून् इति अर्थात् ज्या-धनुर्गुणः गौरुच्यते यतोहि सा गम्या अर्थात् गोविकारभूता तन्त्वात्मा तदा ताद्धितम् भवति। अथ पुनः न चेद् गम्या तथा गमयतीषून् इति अर्थात् इयं गोसञ्ज्ञका ज्या मौर्वी वा इषून् बाणान् स्वलक्ष्यं प्रति गमयति प्रेषयति। अतः गम् धातोः अन्तर्भावितण्यर्थेन गो भवति डो-प्रत्ययोगे॥

घ- अथाऽपि पशुनाम इह भवति

५. समुद्रः-

समुद्रवन्त्यस्मादापः। समभिद्रवन्त्येनमापः। संमोदन्तेऽस्मिन् भूतानि। समुदको भवति। समुनक्तीति वा।

— समुद्द्रवन्त्यस्मादापः

वीचि-तरङ्गादिभावेन सम् अर्थात् संहता उत् ऊर्ध्वं द्रवन्ति गच्छन्ति अस्मादापो रश्मिभिराकृष्यमाणा आदित्यमण्डलम्। अतः सम् उत्-पूर्वात् गत्यर्थक-द्रुधातोः डप्रत्यये कृते टिलोपात् समुद्रः सञ्जायते।

— समभिद्रवन्त्येनमापः

आपः एनं समभिद्रवन्ति। अर्थात् सर्वा एव आपो भौमरसलक्षणा वायुना प्रेर्यमाणा, आदित्यमण्डलाद्वा वर्षाकाले रश्मिभिः प्रवर्तमाना निम्नानुसारित्वात् संहताः सति एनं समुद्रमेवोदाभिमुख्येन द्रवन्ति। स हि निम्नतमो भवति सर्वस्मात् जलाशयात्। अतः सम् उपसर्ग-पूर्वकात् अभि-इत्येवं प्रमुक्तेन उद् उपसर्गेण सार्द्धम् गत्यर्थकात् द्रुधातोः कर्मणि ड-प्रत्यये कृते समुद्रो भवति।

— संमोदन्तेऽस्मिन् भूतानि-

अस्मिन् समुद्रे भूतानि बहूदकत्वात् सर्वे सत्त्वानि, जलचराणि अन्तरिक्षचराणि वा सम्यक्तया मोदन्ते संहृष्यन्ति। अतः

सम्‌ो म लोपात् - संपूर्वात् मुद् हर्षे धातोः रक्प्रत्ययप्रयोगात् समुद्रो भवति॥

Scanned with CamScanner

Date
Page

- समुद्रो भवति-

उदक इति जलनाम तत् तस्मिन् संहृतं भवति अर्थात् शोभन जलोपेतं भवति। अतः एकीभावार्थक सम्-उपसर्गपूर्वात् उदकात् मत्वर्थीय र-प्रत्यये कृते समुद्रम् सिद्ध्यति। अतः एकीभूतं उदकम् अस्मिन् विद्यते वर्षाकाले वर्षासु इति समुद्रः।

- समुनत्तीति वा

समुनत्ति अर्थात् सङ्क्लेदयति अब च सम्यग् रूपेण क्लेदयति उन्दीकरोति इति समुद्रः। अतः उन्दी क्लेदने सम्-उपसर्गयोगात् रक् प्रत्यये कृते समुद्रो भवति। उन्द धातो नवर्णस्य लोपेन सिद्ध्यत्ययं शब्दोऽयं च यास्कमतेनाऽयं वर्षेण भुवनम् उनत्ति सम्यक्तया अतः समुनत्ति वर्षेण भुवनमिति समुद्रः इत्यपि वक्तुं शक्यते॥

६- वृत्रः

वृत्रो वृणोतेर्वा, वर्ततेर्वा, वर्धतेर्वा

अर्थात् वृत्रो वृ आवरणे धातोः, वृतु वर्तने धातोः वृधु वृद्धौ धातोः कर्मणि क्त्रो सूत्रात् क्त्रो प्रत्यये कृते निष्पद्यते।

- यदवृणोत्तद्वृत्रस्य वृत्रत्वमिति विज्ञायते -

अर्थात् अन्तरिक्षमुदकं वा अवृणोत् तद् वृत्रस्य वृत्रत्वम्। अथवा

- यदवर्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते -

अर्थात् इन्द्रेण हतो वृत्रो मेघः अधो निपत्य अपवृत्त आपः वृष्टिभावेन अवस्थित प्रावर्तयत् तद्वृत्रस्य वृत्रत्वम्।

- यदवर्धत तद् वृत्रस्य वृत्रत्वम् -

असौ अतिमात्रम् आप्लुत्य। मेघो हि अतिमात्रं वर्धते इति प्रसिद्धम्। मेघ इति नैरुक्ताः, त्वाष्ट्रोऽसुर इत्यैतिहासिकाः। इन्द्रवधार्थं त्वष्ट्राकृते वीचे सोमेऽग्नौ वृत्र उत्पन्न इत्याम्नायते॥

६- **आदित्यः**

आदत्ते रसान् आदत्ते भासं ज्योतिषाम् । आदीप्तो भासेति वा । अदितेः पुत्र इति वा ॥

- **आदत्ते रसान्** ~~आदत्ते भासं ज्योतिषाम्~~

असौ आदित्यः स्वरश्मिभिः पृथिवीतो भूपृष्ठस्थ- रसान् जलम् आदत्ते गृह्णाति अतः आङ्पूर्वात् दद्धातोः डित्यजौणादिकात् डित्वाट्टिलोपात् आदित्यो निष्पद्यते ।

- **आदत्ते भासं ज्योतिषाम्-**

ज्योतिषां ग्रहनक्षत्रादीनां भासं प्रकाशं आदत्ते गृह्णाति । अर्थात् एतस्योदये सति चन्द्रादीनां ग्रहनक्षत्राणां प्रभानाशो भवति । अतः उपर्युक्तवदेव आङ्पूर्वात् दा धातोः निष्पद्यतेऽयं शब्दः ।

- **आदीप्तो भासेति वा-**

सविता हि एष भासा आदीप्तो ऽर्थात् अभितो भवति अतः स्वभासाऽऽदीप्यत इत्यादित्यः । आङ्पूर्वकात् दीप् धातोः यत्-प्रत्यये कृते निष्पद्यते ।

- **अदितेः पुत्र इत्यादित्यः-**

अदितेः देवमातुः कश्यपस्य पत्न्याः पुत्रः सोऽयमादित्यः सन् आदित्य इत्युच्यते । अतः अदितेर- पत्यमित्यर्थे अदितिशब्दात् अपत्यार्थके ण्यप्रत्यये कृते यस्येति च सूत्रेण इकारलोपपूर्वकं आदिवृद्धौ जायते आदित्यः ॥

७- **उषस्-**

उच्छतीति सत्याः । वष्टेः कान्तिकर्मणः । रात्रेरपरः कालः ।

- **उच्छतीति सत्याः -**

उच्छति विवासयति नाशयति तमांसि इत्येवमस्या भास एतस्मिन् कर्मणि सत्याः कर्तरि कारके उषा भवति । अतः उच्छी विवासे धातोः असुन् प्रत्यये कृते छस्य षः भूत्वा चकार लोपात् बहु-प्रयोगेण उषस् भवति । असि -के उष दाह औणादिकः का प्रत्ययात् उषा भवति ।

Scanned with CamScanner

वष्टे: कान्तिकर्मणः

तमांसि नाशयित्वा कान्तिमयं कमनीयं सर्वजनप्रियं कालमुत्पादयति इति वश कान्तिकर्मणः सम्प्रसारणपूर्वकम् उषस् भवति अ इयम् रात्रेः अपरः कालो भवति।

उषस् शब्दोऽयम् आकारान्तोऽपि दृष्टिपथमुपयाति या स्वसरस्य पत्नीरूपेण ऋग्वेदे प्रस्तुता।। अत्र तु सान्तं स्त्रीलिंग मुषस् शब्दो विवेच्योऽस्ति।

९- मेघः

मेहतीति सतः यतोहि असौ मेहति सिञ्चति पृथिवीम् अर्थात् जलबिन्दुद्वारेण असौ मेघः सर्वत्र मेहति अतः मिह् सेचने धातोः पचाद्यच्-सूत्रेण अच् प्रत्यये कृते न्यङ्क्वादित्वात् भवति न्यङ्क्वादीनां च हकारस्य कुत्वम् इति नियमात् हकारस्थाने घकारो भूत्वा गुणादेशपूर्वकम् सुप्-प्रयोगेन मेघः सिद्ध्यति।

१०- वाक् -

वाक् कस्मात् वचेः अर्थात् वाक्शब्दो वच्-धातोः सम्भूतः क्विबन्तः। वक्ति इति वाक्। उच्यते या सा वाक् उच्यतेऽनयेति वाक्। वचेः क्विप् योगाद् दीर्घोऽसंप्रसारणं च कृत्वा चकारस्य ककारो भूत्वा वाक्शब्दो निष्पद्यते।

११- उदकम् -

उदकं कस्मात्। उनत्तीति सतः। तद्धि यत्र भवति यत्र गच्छति तदुनत्ति क्लेदयति। अतः उन्दी-क्लेदने धातोः ण्वुल्-प्रत्यये कृते नलोपाद् उदकम् भवति॥

Scanned with CamScanner

१२. नदी -

नदना भवन्ति शब्दवत्यः

अर्थात् नद्यः खलु नदन्तीति नदनाः शब्दवत्यः शब्द-
संयुक्ता स्रोता भवन्ति । नदन्ति हि प्रवहन्ति इति नदी । अतः णद् अव्यक्ते
धातो शब्दे ल्यु-प्रत्यये कृते योरनि च कृते सति नदो भवन्ति । तदनन्तरम् नदट्-
चोरट्-देवट् इत्यादयष्टितो नदी चोरी देवी इति आदेशात् नदी सिद्ध्यति ।

१३. अश्वः

अश्नुतेऽध्वानम् । अश्नुतेऽध्वानम् । महाशनो भवतीति वा ।

- अश्नुतेऽध्वानम् -

अश्नोति ह्यसौ इत्यध्वा इत्येवमश्वमाचक्षीरन्

- अश्नुतेऽध्वानम् -

अर्थात् अध्वानम् मार्गं अश्नुते व्याप्नोति इति अशू-व्याप्तौ
धातोः क्वन् प्रत्यये कृते अश्वो भवति

- महाशनो भवतीति वा -

महाशनोऽर्थात् बहुभोजी भवति एव अत एव
अश्व उच्यते । अथवा अश्नातीति इति अश्वः । बहुलमर्थतः । सर्वम् एव
हि अश्नाति तेन नामाभिधानमतिशयार्थं गमयति ।

अश्नातीत्यश्वः महाशनो भवतीति वा । महदशनं यस्य स
महाशनोऽश्वः अश्वः । महाशनः महद महनीयं प्रशंसनीयं बहुमूल्यमशनं
भोजनमस्येति महाशनः । अतः भक्षणार्थकेन भवना प्रशंसार्थकेन अश् धातुना
क्वन् उणादि योगेन अश्वः भवति ।

१४. अग्निः -

अग्रणीर्भवति । अग्रं यज्ञेषु प्रणीयते । अङ्गं नयति संनममानः । अक्नोपनो
भवतीति स्थौलाष्ठीविः । न क्नोपयति न स्नेहयति । त्रिभ्य आख्यातेभ्यो
जायते इति शाकपूणिः । इतात् अक्तात् दग्धाद्वा नीतात् । स खल्वेते
अ अकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परस्तस्यैषा भवति ।

- अग्रणीर्भवति-

सर्वेष्वर्थेषु यथाऽऽत्मानमग्रं नयति, कर्मफलं वाऽग्रे नयति कर्माधिपत्ये व्यवस्थितः इत्यसौ अग्रणीः मुख्यो भवति। यथा सेनाधिपत्ये अवस्थितः सेनां नयन् सेनानीरित्युच्यते तथैव अग्रणीतः अग्निः भवति

- अग्रं यज्ञेषु प्रणीयते-

यज्ञादिकर्मसु अग्रं प्रथमं प्रणीयते। यावदयं न प्रणीयते तावत् किञ्चिदन्यं न क्रियते। ततोऽस्मिन् सति तदनुपेत्यान यानि कर्माणि क्रियन्ते अत एव अग्रणीर्भवति॥

- अङ्गं नयति संनममानः-

यत्राऽपि लौकिके वैदिके वाऽर्थे साधनत्वेन सन्नमयात्मानं तत्र संनममान एवाऽऽत्मानं प्रधानीकृत्य सर्वम् अन्यद् आत्मनोऽङ्गं नयति अतः अङ्गनयनाद् अग्निः उच्यते। यद् वा यत्र तृणे काष्ठे वा सन्नमति आश्रयति आत्मनोऽङ्गमङ्गं तं नयति अर्थात् सर्वम् आत्मसात् करोति भस्मीकरोतीत्यर्थः।

- अक्नोपनो भवतीति स्थौलाष्ठीविः

स्थौलाष्ठीविमतानुसारेण न क्नोपयति न स्नेहयति। अर्थात् विरूक्षीकरोति इत्यर्थः। यतो हि तस्य स्वभावोऽस्ति यद्देशोऽन्नमपि भस्मीकरोति। अतः क्नूयीशब्दे उन्देश्च कुक् णौ यलोप गुणौ चाक्नूः भूत्वा अग्निः भवति पृषोदरादिः। अक्नूय+प णिच् = अक्नोपि र अक्नोर अग्नोर = अग्निः भवति।

- त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिः-

इतात् इण् गतौ अक्तात् दग्धाद्वा अञ्जेर्दहतेर्वा विकल्प एतयोः नीतात् णीञ् प्रापणे धातोः जायतेऽग्निशब्दः। अत्र एतेर्धातोः क्तिहतात् अयादेशात् अकारमादत्ते अञ्जूधातोः दहधातोर्वा चाकारमादत्ते (क्विपिकृत नलोपकुत्वजश्त्वादग् इति रूपमापन्नात् गकारं वे अथवा दहते कृतघत्वजश्त्वाद् निबन्धादेव घोगिति रूपमापन्नात् गकारमादत्ते) नीः परः कृतह्रस्वः अग्निः। एतिन्च व्यनक्ति च रूपाणि दहति वा हविर्नयति च देवेभ्यस्तत् प्रयच्छति वा कर्मफलं तत् तत् देवतासत्कृतहवि षे यजमानायेति निरुक्तकारः॥

१५. जातवेदः

जातानि वेद। जातानि वैनं विदुः। जाते जाते विद्यत इति वा। जातवित्तो वा जातधनः। जातविद्यो वा जातप्रज्ञानः। यत् तज्जातः पशूनविन्दतेति तज्जातवेदसो जातवेदस्त्वम्॥

- जातानि वेद-

स हि जातानि सर्वाणि भूतानि वेद जानाति लोकपालत्वात् नहि तदस्ति जातम् अस्मिन् लोके यदसौ न वेद अर्थात् न जानाति। अतः जातशब्दोपपदात् विद् अथवा विन्द धातुना कर्तरि असुन् प्रत्यये कृते जातवेदो भवति।

- जातानि वैनं विदुः

जातानि सर्वाणि भुवनानि एनं विदुः एनं जानन्ति अर्थात् जातैः प्राणिसंघैः असौ विद्यते ज्ञायते इति। अतः पूर्ववत् विद् वा विन्द धातोः कर्मणि असुन् भूत्वा सञ्जायते।

- जाते जाते विद्यत इति वा-

जाते-जाते अर्थात् सर्वस्मिन् भूतजाते विद्यते। न तदस्ति जातं यत्रासौ नास्ति। सत्तार्थोऽत्र विदिति विशेषः व्युत्पत्तिस्तु पूर्ववदेव।

- जातवित्तो वा जातधनः।

जातमस्य वित्तमिति जातवेदः। जातं वेदो हविर्लक्षणं धनम् ऐश्वर्यादि इतरद्वा यस्य स

- जातविद्यो वा जातप्रज्ञानः

जातमात्र एव विद्योतते प्रज्ञानस्वभावत्वादिति। जातविद्यः सन् जातवेदाः। अथवा जातं वेदः प्रज्ञानं यस्य सः। यद्वा जातं वेदो विचारणं यस्य सः

- विन्दतेरर्थेष निर्वक्तुं शक्यते यतोहि स यत् तत् जातः जातमात्र एव निसर्गतः पशून् अविन्दत अलभत। यथोक्तं यत्तज्जातः पशूनविन्दतेति तज्जातवेदसो जातवेदस्त्वम्। तस्मात् सर्वान् ऋतून् पशवोऽग्निमभिसर्पन्ति॥ —

Scanned with CamScanner

11

Date
Page

१६- वैश्वानरः

विश्वान्नरान्नयति । विश्वे एनं नरा नयन्तीति वा । अपि वा विश्वानर एव स्यात् । प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वानरः ॥

विश्वान् नरान् नयति-

इतो लोकादमुं लोकं हेतुकर्तृत्वेन । सर्वासु प्रवृत्तिषु अयमेव नरान् नयति । अतोऽयं विश्वान् सर्वान् नरान् अग्निपितृदेवलोकं वा नयति । इत्थं शब्दोऽयं विश्वपदपूर्वात् णीञ् नये धातुतो नरति नयतीति नरो भूत्वा पूर्वपदस्य दीर्घेण विश्वेषां नरः वैश्वानरः भवति ।

विश्वे एनं नरा नयन्तीति वा—

स तासु तासु क्रियासु नरैः अग्नि-भावं नीयमानः कर्म संपद्यते तथा च नरैः कर्मणि प्रदोरपू षष्ठीसमासः ॥ एवं विश्वे नरा सर्वे नरा नयन्ति इति वैश्वानरः

अपि वा विश्वानर एव स्यात्

अर्थात् विश्वान् अर विश्वानि भूतानि प्रतिऋतः प्रतिगतः प्रविष्टः स्यात् । अतः विश्वान् जन्तून अरः व्याप्तः प्रविष्टः । अत्र अरोऽस्ति ऋगतौ धातोः कृदन्तत्वेन अतः विश्वानरो भूत्वा तस्येदम् अर्थे अपत्यार्थे अण् प्रत्ययेन वैश्वानरो भवति ।

१८- निघण्टु-

निगमा इमे भवन्ति । छन्दोभ्यः समाहृत्य-समाहृत्य समाम्नाताः ते निगन्तव एव सन्तो निगमनात् निघण्टव उच्यन्ते इत्यौपमन्यवः अपि वाऽऽहननादेव स्युः समाहता भवन्ति, यद्वा समाहृता भवन्ति

(P.T.O)

Scanned with CamScanner

- निगमा इमे भवन्ति-

नि- निश्चयेन अधिकं वा निगूढार्थम् वा मन्त्रार्थान् गमयन्ति बोधयन्ति इति निगमसञ्ज्ञकाः सन्तो निघण्टवो भवन्ति (छन्दांसि)

- ते निगन्तव एव सन्तो निगमनान्निघण्टव इत्यौपमन्यवः -

निगमनात् मन्त्रार्थनिगमयितृत्वाद् हेतोः निगन्तवो निगमयितारः निश्चयेनार्थावगतिकराः सन्तः निघण्टव निघण्टवो भवन्ति। यस्मात् निगमयितार एते निगन्तव इति निघण्टव इत्युच्यन्ते॥

- अपि वाऽऽहननादेव स्युः समाहता भवन्ति यद्वा समाहृता भवन्ति-

समाहताः सम् सम्यक् आ मर्यादया हताः पठिताः भवन्ति। तस्मात् आहननक्रियायोगात् समाहन्तव एव एते सम्पन्नाः उपसर्गप्रत्ययोपसर्गाद्याहारवर्णव्यापत्तिभिः अति परोक्षवृत्तितामापादिताः सन्तो निघण्टव इत्युच्यन्ते। पाठार्थे हन्तेः प्रयोगः प्रसिद्धः। ब्राह्मणे इत्समाहत्य

अथवा एते समाहृता भवन्ति। छन्दोभ्यः समाहृत्य तस्मात् समाहरणक्रियायोगात् समाहर्तव एव एते सम्पन्नाः उपसर्गप्रत्ययादि क्रमेण अतिपरोक्षवृत्तितामापादिताः सन्तो निघण्टव इत्युच्यन्ते॥

(अतिपरोक्षवृत्ति में धातु स्पष्ट ही नहीं होता)